# श्रीदेवराजगुरुभिरनुगृहिता
# ॥ श्रीशैलेशाष्टकम् ॥
## Shri Shaileshaashtakam:

शेषः श्रीमानजनि हि पुरा सौम्यजामातृयोगी
भोगी भूतस्तदनु भगवान् राघवस्यानुजन्मा ।
भूत्वा भव्यो वरवरमुनिर्भूयसा भासमानः
रक्षस्वस्मान् रघुकुलातेरास्थितो भद्रपीठम् ॥ १ ॥
श्रोतुं द्राविडवेदभूरिविवृतिं सौम्योपयन्तुर्मुनेः
उत्कण्ठाऽस्ति ममैनमानयत तं ताक्ष्र्याश्रयं मण्डपम् ।
आविश्यार्चकमूचिवानिति सुदा निश्शेषकान्वितः
रङ्गी वत्सरमेकमेवमश्टणोत् व्यक्तं यथोक्तक्रमात् ॥ २ ॥
श्रीभूभ्यां रङ्गनाथे शठजिदुपनिषद्याक्रियां श्रोतुकामे
शेषस्सन्तोषयिष्यन् वरवरमुनितां प्राप्य यो वर्ततेऽग्रे ।
काषायश्रीतुलस्यम्पुजमणिसुशिखायज्ञसूत्रत्रिदण्डैः
भन्तं शुभ्रोर्ध्वपुण्ड्रं स्मर हृदय सदा कोशमुद्राङ्कहस्तम् ॥ ३ ॥
कृपया परया स रङ्गराट् महिमानं मगतां प्रकाशयन् ।
लुलुभे स्वयमेव चेतसा वरयोगिप्रवरस्य शिष्यताम् ॥ ४ ॥
समाप्तौ ग्रन्थस्य प्रथितविविधोपायनचये परं
सच्चीभूते वरवरमुनेरङ् घ्रिसविधे ।
हठाट्बालः कश्चित् कुत इति निरस्तोऽप्युपगतः
जगौ रङ्गेशाख्यः परिण तचतुर्हायन इदम् ॥ ५ ॥
श्रीमान् रङ्गेश्वरो यद्वकुलवरवचोभाष्यसारार्थजातं
श्रुत्वा सौम्योपयन्ता मुनिवरचरणे च्छात्रभावं प्रपन्नः ।
श्रीशैलेशेति पद्यं खगपतिनिलये मण्डपे तत्समाप्तौ
उक्त्वाऽध्येतव्यमेतन्निखिलनिजगृहेष्वादिशत्तत्तदादौ ॥ ६ ॥
वेदादौ पूर्वमुक्त्वा हरिरिति सुजनो वक्ति पश्चाद्यथोमित्येवं
वक्तव्यमेतद्वकुलधरवचोऽनुश्रवारम्भकाले ।

श्रीशैलेशेति पद्यं प्रथममथ सतां संप्रदायैकनिष्ठैः

लक्ष्मीनाथेति पद्यं स्वयमिति भगवानादिशद्रङ्गनाथाः ॥ ७ ॥

यद्वद्वक्तं न युक्तं प्रणावहरिपदाभ्यन्तरेऽन्यत्पदं तत्

कृष्णोत्येतत्कदाचिन्मुनिशतवचनैर्वैदिकैर्ब्रह्मनिष्ठैः ।

तद्वद्रङ्गेशभक्तैः शमदमनियतैः साधुभिस्तत्त्वविद्भिः

वक्तं युक्तं न मध्ये सपदि नियतयोरेतयोः पद्यमन्यत् ॥ ८ ॥

शठरिपुरेक एव कमलापतिदिव्यकविः

मधुरकविर्यथा च शठजिन्मुनिमुख्यकविः ।

यतिकुलपुङ्गवस्य भुवि रङ्गसुधाकविराट्

वरवरयोगिनो वरदराजकविश्च तथा ॥ ९ ॥

इति श्रीशैलेशाष्टकं समाप्तम्